A

# SAMAGRA SHIKSHA, KERALA

1011

## Second Terminal Evaluation - 2022-23

First Language - Paper I - Part I

## SANSKRIT

(For Academic and Oriental Sanskrit Schools)

**Class- X**

**Time - 1 ½ Hours** **Total Score - 40**

निर्देशाः -

- १५ निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

**1. अधोदत्तेषु चतुर्णां प्रश्नानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत।** 4x1=4

क) वेदानां कालनिर्णयं कर्तुं कः प्रयतितवान् ?

(महात्मा गान्धी, बालगङ्गाधरतिलकः, डा. एस् .राधाकृष्णः, लाल् बहदूर् शास्त्री)

ख) 'वाच्यस्त्वया मद्वचनात् स राजा।' - इति का वदति ?

( दमयन्ती, भटपत्नी, सीता, द्रौपदी)

ग) कः राजा त्यागराजस्वामिना सह मैत्रीं ईप्सितवान्?

(शरभोजी, स्वातितिरुनाल्, मार्ताण्डवर्मा, विशाखं तिरुनाल् )

घ) धिक् - शब्दयोगे का विभक्तिः?

(द्वितीया, तृतीया, चतुर्थी, पञ्चमी)

ङ) फलपाकान्तः सस्यविभागः कः ?

(वीरुत्, वनस्पतिः, ओषधिः, वृक्षः)

**2. यथोचितं योजयत।** 4x1=4

| | | |
|---|---|---|
| क) | शिशुपालवधम् | - आत्मकथा। |
| ख) | निधिचालसुखमा | - शिवः। |
| ग) | गिरिशः | - माघकाव्यम्। |
| घ) | सत्यशोधनम् | - कल्याणिरागः। |

3. उदाहरणानुसारं सन्धिच्छेदं लिखत। 1x1=1

उदा- वनौकसोऽपि - वनौकसः + अपि।

क) ग्रामीणोऽपि - .......... + ..........।

4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

क) रे मानस! सत्यं वद रमणीयम्।

5. उदाहरणानुसारं एकपदं लिखत। 1x1=1

उदा- तव वचनात् - त्वद्वचनात् ।

क) मम वचनात् - ......................।

6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत । 4x2=8

6. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत।

क) त्यागराजस्वामी देवालये कीर्तनमालपन् विराजमानः अवर्तत।

7. अधोदत्तं श्लोकं पठित्वा गद्यक्रमं पूरयत।

मयापि देयं प्रतिवाचिकं न ते
स्वनाम मत्कर्णसुधामकुर्वते।
परेण पुंसा हि ममापि सङ्कथा
कुलाबलाचारसहासनासहा।।

गद्यक्रमः - स्वनाम .......... अकुर्वते ते .......... प्रतिवाचिकं न देयम्। हि ममापि .................. पुंसा .............. कुलाबलाचारसहासनासहा (भवति)।

8. उदाहरणानुसारम् उचितरूपेण पूरयत।

उदा- संस्कृतपठनात् ऋते कश्चन यथार्थभारतीयः न भवति।

क) ................. ऋते सस्यानि न वर्धन्ते। (सूर्यप्रकाशम्)

9. अधोदत्तं वाक्यं पठित्वा प्रधानकर्म अप्रधानकर्म च विविच्य लिखत।

उदा - देवर्षिः गिरीशं गिरिजां ययाचे।

प्रधानकर्म -गिरिजाम्। अप्रधानकर्म - गिरीशम्।

क) छात्रः अध्यापकं पुस्तकं पृच्छति।

प्रधानकर्म - ............। अप्रधानकर्म - ............।

10. उदाहरणानुसारं वर्गीकुरुत।

प्रख्यातः, अयच्छत्, प्रकामम्, यथेष्टम्, अदात् , प्रसिद्धः

| | पदम् | समानार्थकपदम् |
|---|---|---|
| उदा - | प्रकामम् | यथेष्टम् |
| | ................ | ................ |
| | ................ | ................ |

11-13 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

एवं वादिनि देवर्षौ
पार्श्वे पितुरधोमुखी।
लीलाकमलपत्राणि
गणयामास पार्वती।।

क) पार्वती कस्य पार्श्वे तिष्ठति?

ख) सा कानि गणयामास?

ग) अस्मिन् श्लोके क्रियापदं किम् ?

घ) नम्रमुखी - इत्यर्थे प्रयुक्तं पदं किम्?

12. रूपरेखां पठित्वा जीवनचरितं लिखत।



| | | |
|---|---|---|
| नाम | - | प्रोफ्.अत्तिप्पोट्ट वार्य शङ्करः |
| जन्म | - | 1925 जनुवरि 12 पालक्काट् जनपदे |
| पितरौ | - | गोपालवार्यर्, कुञ्ञुकुट्टि वारस्यार् |
| प्रशस्तिः | - | अध्यापकः, साहित्यकारः |
| पुरस्कारः | - | हेमलतास्मारकश्रीचट्टम्पिस्वामीसाहित्यपुरस्कारः, कविकुलचूडामणिविरुदः |
| कृतयः | - | तीर्थपादपुराणं, मणिकण्ठीयम्, शङ्करोदन्तम्, कनकचन्द्रिका, भारतसङ्ग्रहः इत्यादीनि। |
| मृत्युः | - | 2000 मार्च् 31 |

13. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

समाजे उन्मादकवस्तूनाम् उपयोगः वर्धमानः दृश्यते । उन्मादकवस्तूनां दुरुपयोगेन स्वास्थ्यसमस्याः जायन्ते । उन्मादकवस्तूनाम् उपयोगेन यत् सुखं प्राप्यते तत् अस्थायि भवति। एतेषाम् उपयोगेन बुद्धिः, चेतना, स्मृतिः, आत्मनियन्त्रणं च नश्यते । तेषाम् उपयोगस्य निराकरणाय, निवारणाय च प्रतिवर्षं जून् 26 उन्मादकवस्तुविरुद्धदिनत्वेन विश्वे आचर्यते। यदि वयं मिलित्वा प्रयत्नं कुर्मः चेत् समाजात् उन्मादकवस्तूनि निर्मार्जयितुं शक्नुमः।

क) उन्मादकवस्तुविरुद्धदिनं कस्मिन् दिनाङ्के भवति ?

ख) उन्मादकवस्तूनाम् उपयोगेन किं किं नश्यते ?

ग) खण्डिकातः क्त्वान्तमव्ययं चित्वा लिखत ।

घ) समाजे केषाम् उपयोगः वर्धमानः दृश्यते ?

14. आदेशिकभाषया विवर्तयत। 1x5=5

कालिदासस्य प्रथमं संस्कृतनाटकम् भवति मालविकाग्निमित्रम् । पञ्चाङ्कयुक्ते नाटकेऽस्मिन् मालविकाग्निमित्रयोः प्रणयवृत्तान्तः वर्णितः अस्ति । अग्निमित्रः एकदा मालविकायाः चित्रं दृष्ट्वा तस्याम् अनुरक्तः भवति । अनन्तरसञ्जाताः कथाः अत्र वर्ण्यन्ते। अस्मिन् नाटके कालिदासेन नायकस्य नायिकायाः च प्रेम मनोहररीत्या आविष्कृतं भवति।

15-17 प्रश्नेभ्यः द्वयोः उत्तरे लिखत । 2x4=8

15. अधोदत्तं सन्दर्भं पठित्वा सम्भाषणांशान् पूरयत।

सङ्गीतच्छात्रः नवनीतः कर्णाटकसङ्गीतज्ञेन नारायणेन सह अभिमुखभाषणं करोति। श्रुतिरागकृतिकीर्तनानि अधिकृत्य चर्चा प्रवर्तते।

नवनीतः - नमस्ते, महोदय।

नारायणः - ..........., उपविशतु।

नवनीतः - आचार्य, .......... अधिकृत्य ज्ञातुमिच्छामि।

नारायणः - रञ्जयति सहृदयानां मनांसि इति रागः।

नवनीतः - ........... इति पञ्चरत्नकीर्तनेषु अन्यतमं कस्मिन् रागे निबद्धं भवति?

नारायणः - एन्तरो महानुभावुलु इति कीर्तनं श्रीरागनिबद्धमेव।

नवनीतः - इदं कीर्तनं ........... विरचितम्?

नारायणः - त्यागराजस्वामिना विरचितम्।

नवनीतः - धन्यवादः।

16. उदाहरणानुसारं पट्टिकां पूरयत ।

| | काव्यम् | कर्ता | स्त्रीकथापात्रम् |
|---|---|---|---|
| उदा: - | रघुवंशम् | कालिदासः | सीता। |
| | ................. | माघः | भटस्त्री । |
| | किरातार्जुनीयम् | भारविः | ................. । |
| | नैषधीयचरितम् | ................. | दमयन्ती । |
| | कुमारसम्भवम् | कालिदासः | ................. । |

17. सूचनाः उपयुज्य शकुन्तलामधिकृत्य लघूपन्यासं लिखत।

सूचनाः - अभिज्ञानशाकुन्तलम् - नायिका- नायिकागुणाः- पतिगृहगमनं- यात्रानुमतिः पितृभक्तिः - सहजीविस्नेहः ।